UGVYDS604

महाभाष्यम् (पस्पशाप्रत्याहाराह्निकञ्च)

चतुर्थपत्रम्

पूर्णाङ्काः – 60

समयः – सार्धघण्टाद्वयम्

अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम्। 1×10 =10

1. अथ शब्दानुशासनमित्यत्र अथशब्दस्यार्थः कः?
2. कस्तर्हि शब्दः ?
3. षट्स्वङ्गेषु प्रधानं किम् ?
4. आहोस्विद् इत्यस्य कः अर्थः ?
5. शब्दस्य ज्ञाने धर्मः आहोस्वित् प्रयोगे ?
6. कानि सन्धि-अक्षराणि ?
7. के वर्णाः सवर्णसंज्ञां प्राप्नुवन्ति ?
8. माहेश्वरसूत्रेषु हकारस्य कति वारमुच्चारणं विद्यते ?
9. माहेश्वरसूत्रेषु णकारस्य अनुबन्धरूपेण कतिवारमुच्चारणं विद्यते ?
10. कति अनुनासिकवर्णाः सन्ति ?

अधस्तनेषु पञ्चप्रश्नाः समाधेयाः। **6×5 =30**

11. व्याकरणाध्ययनस्य गौणप्रयोजनानि संक्षेपेण प्रदर्शयत।
12. धर्मनियम इत्यत्र त्रिविधव्युत्पत्तिः प्रदर्शनीया।
13. अ इ उ ण् सूत्रं विमृश्यताम्।
14. अणुदित्सवर्णस्य चाप्रत्ययः इति सूत्रे अण् प्रत्याहारे पूर्वस्य वा परस्य णकारस्य ग्रहणं भवति भाष्यदिशा वर्णयत।
15. दुष्टः शब्दः, इति गौणप्रयोजनं भाष्यदिशा प्रतिपादयत।
16. नित्यपर्यायवाची सिद्धशब्दः इति प्रमाणपुरस्सरं प्रतिपादयत।
17. उरण् रपरः इति सूत्रे अण् प्रत्याहारे पूर्वस्य वा परस्य णकारस्य ग्रहणं भवति भाष्यदिशा प्रतिपादयत।

अधस्तनेषु प्रश्नेषु द्वौ समाधेयौ। **10×2 = 20**

18. अथ शब्दानुशासनम्, इति विषयमधिकृत्य एकं निबन्धनं रचयत।
19. लक्ष्यलक्षणे व्याकरणम् इति भाष्याशयं सम्यक् प्रतिपादयत।
20. अकारस्य विवृतोपदेशः कर्तव्यः इति भाष्यपङ्क्तेः आशयं प्रतिपादयत।
21. किमिदमक्षरमिति भाष्यदिशा वर्णयत।

****